**संस्कृत-वार्ताः**

**दिनाङ्क : 07/02/2026** **सायम् - 06:20**

**<u>आदौ मुख्यवार्ताः</u>**

- भारत-अमरीका-देशयोर्मध्ये अन्तरीम-व्यापार-सन्धेः संरचना द्वयोः देशयोर्मध्ये वर्धमानं गहनं, विश्वासं, गतिशीलतां च प्रतिबिम्बयति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्।
- प्रधानमन्त्री नरेन्द्रमोदी द्विदिवसीय-आधिकारिकयात्रायाम् मलेशिया-देशे अस्ति, द्विपाक्षिकसम्मेलने सहभागेन सह सन्धिपत्राणि च हस्ताक्षरिष्यति।
- राष्ट्रपतिः द्रौपदी-मुर्मुः छत्तीसगढस्य जगदलपुरे 'बस्तर् पाण्डुम्-2026' इति भव्यजनजातीय-सांस्कृतिक-उत्सवस्य उद्घाटनम् अकरोत्।
- इस्लामाबाद्-नगरस्य मस्जिद-विस्फोटस्य भारतेन निन्दा कृता; उक्तञ्च पाकिस्तानदेशः अन्येषु दोषारोपयन् स्वयं भ्रान्तौ स्थातुमिच्छति।
- बी. सी. सी. आई. इत्यनेन अण्डर्-19 इति पुरुषाणां क्रिकेट-विश्वकप् इति विजेत्रे भारतीयदलाय सार्धसप्तकोटि रूप्यकाणां धनपुरस्कारस्य घोषणा कृता।

**<u>वार्ताः</u>**

**<u>भारत-अमेरिका डील</u>**

भारत-अमेरिका-देशौ अद्य अघोषयताम् यत् तौ परस्पर-लाभप्रद-व्यापारस्य विषये अन्तरीम-सन्धेः प्रारूपं प्राप्तवन्ताविति। वाणिज्योद्योग-मन्त्रालयः भारत-अमेरिका-संयुक्त-वक्तव्यम् समुल्लेखयन् उक्तवान् यत् एतत् प्रारूपं विस्तृतस्य भारतामरीकयोः, द्विपाक्षिकव्यापाराय प्रतिबद्धतां पुनः दृढीकरोतीति। संयुक्त-वक्तव्यानुसारं, अमेरिका-देशः भारतीय-वस्तूनां उपरि अष्टादश-प्रतिशतं पारस्परिक-शुल्कं प्रवर्तयिष्यति। भारतं सर्वेषु अमेरिकीय-औद्योगिक-वस्तूनां, अमेरिकीय-खाद्य-कृषि-उत्पादानां च विस्तृत-श्रेण्याः शुल्कं निष्कासयिष्यति उतो वा न्यूनीकर्तुं शक्नोति।

**<u>भारत/ प्रधानमन्त्री अमेरिकादेशः</u>**

प्रधानमन्त्री नरेन्द्रमोदी भारत-अमेरिका-देशयोर्मध्ये अन्तरीम-व्यापार-सन्धेः प्रारूपं महत्वपूर्णा वार्तेति अमन्यत्, देशयोश्च मध्ये सुदृढसम्बन्धेषु व्यक्तिगतप्रतिबद्धतायै अमेरिका-देशस्य राष्ट्रपतये डोनाल्ड ट्रम्पाय सः धन्यवादान् वितरयन् सामाजिक-प्रसार-माध्यमे अकथयत् यत् एषा संरचना भारत-अमेरिका-सहभागित्वस्य वर्धमानं गहनं, विश्वासं, गतिशीलतां च प्रतिबिम्बयतीति। श्रीमोदी अवदत् यत् एतत् भारतस्य परिश्रमिभ्यः कृषकेभ्यः, उद्यमीभ्यः  नवोद्योगिभ्यः, मत्स्यजीवीभ्यश्च नूतनान् अवसरान् उद्घाटयित्वा 'मेक् इन् इण्डिया' इत्येतं सुदृढं करोतीति।

**<u>जयशङ्करः-भारत-अमेरिकाः</u>**

विदेशमन्त्री डा. एस. जयशङ्करः अद्य अवदत् यत् अन्तरीमसमन्वयस्य संरचना परस्परं लाभप्रदं भारत-अमेरिका-व्यापारसहभागित्वं साधयिष्यतीति।  सामाजिक-प्रसार-माध्यमे डा. जयशङ्करः अवदत् यत् एषा संरचना भारतीय-निर्यातकेभ्यः इतोऽप्यधिक-विपणि-प्रवेशं, अवसराञ्च सुनिश्चितं करिष्यतीति। सः अवदत् यत् नूतनानि दृश्यानि उद्घाटितानि सन्ति यानि मेक् इन् इण्डिया इत्यस्य प्रोत्साहनं करिष्यन्ति।

**<u>शिवराज-भारत-अमेरिका डील</u>**

कृषि कल्याण-मन्त्री शिवराज-सिङ्घ-चौहानः भारत-अमेरिका-व्यापार-अन्तरीम-व्यापार-सन्धेः प्रशंसाम् अकरोत्, येन भारतीय-कृषकाणां पूर्णसंरक्षणं भवतीति च उक्तवान्।

**<u>विराम</u>**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले [www.newsonair.gov.in](http://www.newsonair.gov.in) इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**<u>सर्जियो-भारत-अमेरिका संयुक्त वक्तव्यम्</u>**

अमरीका-देशस्य राजदूतः सर्जियो गोर् इत्यनेन उक्तं यत् व्यापार-आर्थिकसहयोगविषये भारत-अमेरिका-देशयोः संयुक्त-वक्तव्यम् राष्ट्रपतिना डोनाल्ड-ट्रम्पेन प्रधानमन्त्रिणा नरेन्द्रमोदिना च प्रशंसितम्। सामाजिक-प्रसार-

माध्यमे एक्स इत्यत्र एकस्मिन् सन्देशे, सः संयुक्त-वक्तव्यं साधयितुं द्वयोः नेत्रोः नेतृत्वम्, दूरदृष्टिश्च अङ्गीकृतवान् तथा च द्विपाक्षिक-सम्बन्धेषु नूतनं चरणम् इति अवोचत्।

**<u>मलेशियादेशस्य यात्रा जायसवालः</u>**

विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अद्य अवदत् यत् भारतस्य मलेशियादेशेन सह व्यापकः रणनीतिकः-सम्बन्धः अस्ति, यस्य मूलानि ऐतिहासिकैः सांस्कृतिकैश्च सम्बन्धैः सह निहितानि सन्ति। प्रधानमन्त्रिणः नरेन्द्रमोदिनः मलेशियादेशस्य यात्रायाः विषये जायसवालः अवदत् यत् अस्यां यात्रावधौ विविधाः समृद्धाः कार्यक्रमाः आयोज्यन्ते। सः अवदत् यत् एषा यात्रा उभयोः देशयोः मध्ये पारस्परिकान् संबंधान् अपि सुदृढीकरिष्यति।

**<u>राष्ट्रपतिः/ छत्तीसगढ-यात्रा</u>**

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य छत्तीसगढराज्यस्य बस्तरमण्डले आयोजिते "बस्तर पण्डुम" महोत्सवे समारोहम् उद्घाटयन्ती अवदत् यत् बस्तरप्रदेशस्य जनाः जीवनं उत्सवरूपेण यापयन्ति। सा उक्तवती यत् बस्तर-पण्डुम-महोत्सवेन देशः विश्वश्च बस्तरप्रदेशस्य समृद्धां आदिवासी-संस्कृतिं अवलोकयितुं शक्नोति।

**बाइट-राष्ट्रपति 24 सै.**

राष्ट्रपतिः उक्तवती यत् बस्तरप्रदेशः गतचत्वारिंशत् वर्षेभ्यः माओवादिनां आतंकि-समस्यया पीडितः आसीत्। येन आदिवासीसमुदायः, युवजनाः, दलितवर्गाश्च अत्यधिकतया प्रभाविताः अभवन्। सा अवदत् यत् माओवादीहिंसां विरुध्य केन्द्रसर्वकारेण कृतेन निर्णायककार्याचरणेन अस्मिन् क्षेत्रे दीर्घकालात् विद्यमानं भयम्, असुरक्षा, अविश्वासश्च शनैः शनैः समाप्तं जायते।

अस्मिन् उद्घाटनसमारोहे छत्तीसगढस्य राज्यपालः रमन-डेका, मुख्यमन्त्री विष्णुदेवसाई, केन्द्रीयराज्यमन्त्री तोखन साहू च उपस्थिताः आसन्।

**<u>आई.एस. पाक आतंकाचरणम्</u>**

इस्लामिक्-स्टेट्स इति नाम्ना कुख्यातः आई. एस. इत्युपनामकः समूहः पाकिस्तानस्य राजधान्यां इस्लामाबाद-नगरे एकस्मिन् मस्जिद-मध्ये कृतस्य आत्मघाती-विस्फोटस्य दायित्वं स्वीकारम् अकरोत्, यस्मिन् ह्यः शुक्रवासरे नमाज़काले न्यूनातिन्यूनं षट्त्रिंशज्जनाः मृताः, सप्तत्युत्तरैकशत- जनाश्च

व्रणिताः अभवन्। इस्लामिक्-स्टेट् इत्ययं स्वस्य टेलिग्राम्-वाहिन्यां प्रसारिते एकस्मिन् वक्तव्ये अस्य आक्रमणस्य दायित्वं स्व्यकरोत्। भयोत्पादकसमूहः एकं चित्रम् अपि प्रकाशितवान् यस्मिन् आक्रमणकारी सैफुल्ला अन्सारी भुशुण्डीं धारयन्, मुखमाच्छाद्य, तर्जयन् दृश्यते। भारतदेशेन च अस्याम् दुर्घटनायाम् शोकः प्रकटितः, उक्तञ्च पाकिस्तानदेशः अन्येषु दोषारोपयन् स्वयं भ्रान्तौ स्थातुमिच्छति।

**<u>गोयल-इण्डिया यू एस पी सी</u>**

वाणिज्योद्योग-मन्त्री पीयूषगोयलः अद्य अवदत् यत् भारतीय-निर्यातृभ्यः भारत-अमरीका-अन्तरीम-व्यापार-सन्धेः अन्तर्गतं पञ्चाशत प्रतिशतं पारस्परिक-शुल्कं अधुना अष्टादेश प्रतिशतं यावत् न्यूनीकृतम् अस्ति इति। अद्य अपराह्णे नवदेहली-नगरे भारत-अमेरिका-संयुक्त-वक्तव्यस्य विषये प्रसारमाध्यमान् सम्बोधयन् श्री गोयल्-वर्यः अवदत् यत् चीन, पाकिस्तान, बाङ्ग्लादेशः, वियतनाम् इत्यादीनां प्रतिवेशिनां देशानाम् अपेक्षया भारतस्य शुल्कं न्यूनम् अस्ति इति। श्री गोयल् वर्यः अधोरेखितवान् यत् अयं व्यवहारः देशस्य कृषिक्षेत्रस्य, दुग्धक्षेत्रस्य च रक्षणं करोति।

**<u>एस. सी. सी. ए.-मुर्लिधर मोहलः</u>**

केन्द्रीयसहयोग-नागरिक-विमानयान-राज्यमन्त्री मुरलीधरमोहोलः अद्य छात्रान् सहकार-क्षेत्रे व्यावसायिकरूपेण कार्यं कर्तुं उद्बुद्धवान्, येन प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य दृष्टिकोणानुरूपं समृद्धेः सङ्कल्पः साकारः भवेत्। सः पुणे-नगरस्य वैकुण्ठ-मेहता-राष्ट्रिय-सहकार-व्यवस्थापन-संस्थाने वार्षिक-दीक्षान्त-समारोहे सम्बोधयन् आसीत्।

**<u>क्रिकेट</u>**

भारतीय-क्रिकेट-नियन्त्रण-परिषदा भारतीय-पुरुष वर्गस्य अण्डर-१९ क्रिकेट-विश्व चषक स्पर्धा-विजेतृ-दलाय, तेषां सहयोगिभ्यः, चयन-समितये च सार्धं- सप्त-कोटि-रूप्यकाणां पुरस्कारस्य घोषणा कृता। ध्येयास्पदम् वर्तते यत् भारत-दलेन ह्यः जिम्बाब्वे-देशस्य हरारे-नगरे क्रीडितायां अन्तिमायां स्पर्धायां इंग्लैण्ड-दलम् शत-धावनांकैः पराजित्य षष्ठवारं विश्व चषक स्पर्धा विजिता ।

**॥ इति वार्ताः ॥**